द्वितीयः पाठः ,

# मातृदेवो भव

मुकुलः एकः बालकः अस्ति .तस्य एकं मित्रम् अस्ति .तस्य नाम सतीशः अस्ति .एकदा सतीशस्य जननी ज्वरेण पीड़िता अभवत् सा अवदत -भो सतीश !गच्छ ,वैद्यम आनय ."सतीशोअवदत् -अयम् मे क्रीडनस्य कालः मम मित्राणि आगच्छन्ति अहम् क्रीडनार्थम गच्छामि इति उक्त्वा सः बहिः अगच्छत्

तस्मिन् एव काले सतीशस्य मित्रम मुकुलः तत्र प्राप्तः सः सतीशस्य जननीं ज्वरेण पीड़िताम अपश्यत् सः ताम अपृच्छत -"कुत्र सतीशः गतः "इति . सा अवदत् -मित्रैः सह क्रीडितुम गतः .मुकुलः दुखितो अभवत् सः बहिः अगच्छत सः सतीशम क्रीड़ाक्षेत्रात गृहम् आनयत् अवदत् च -हे मित्र एषा तव जननी ज्वर पीड़िता अस्ति त्वया अस्यः सेवा कर्तव्या . किम त्वं न जानासि .तैतिरीयोपनिषद उपदिशति -मातृ देवो भव इति अन्यदपि उक्तम -

अभिवादनशीलस्य नित्यम वृद्धोपसेविनः

चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्

"अधुना सत्वरं गच्छ ,चिकित्स्कम च आनय" इति श्रुत्वा सतीशः वैद्यम आनयत् .तस्य जननी प्रमुदिताऽभवत

## शब्दार्थः

**ज्वरेण** = बुखार से। **वैद्यम्** = वैद्य को। **उक्त्वा** = कहकर। **तत्र प्राप्तः** = वहाँ पहुँचा। **क्रीडितुम्** = खेलने के लिए। **क्रीडाक्षेत्रात्**= खेल के मैदान से। **आनयत्** = लाया। **उपनिषद् उपदिशति** = उपनिषद सीख देती है। **अन्यद् अपि उक्तम्** = और भी कहा गया है। **चत्वारि** = चार। **सत्वरम्** = शीघ्र। **प्रमुदिता** = प्रसन्न।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

क्रीडनार्थं , वृद्धोपसेविनः, क्रीडितुम् , अपृच्छत् , दुःखितोऽभवत् , अभिवादनशीलस्य

**2. एकपदेन उत्तरत -**

(क) सतीशस्य जननी केन पीडिता आसीत् ?

(ख) मुकुलः कस्य मित्रम् अस्ति ?

(ग) कः दुःखितोऽभवत् ?

(घ) कः वैद्यम् आनयत् ?

**3. कः/का, उक्तवान्/ उक्तवती इति लिखत- माता/मुकुलः/सतीशः**

(क) भोः सतीश! गच्छ वैद्यम् आनय। ................................

(ख) अहं क्रीडनार्थं गच्छामि। ................................

(ग) मित्रैः सह क्रीडितुं गतः। ................................

(घ) हे मित्र ! एषा तव जननी ज्वरपीडिता अस्ति। ................................

**4 .पूर्णवाक्येन उत्तरत -**

(क) मुकुलः सतीशस्य मातरम् किम् अपृच्छत् ?

(ख) सतीशः किम् उक्त्वा बहिः अगच्छत् ?

(ग) उपनिषद् किम् उपदिशति ?

(घ) सः सतीशं कुतः आनयत् ?

**5. प्रश्नानाम् उत्तराणि लिखत -**

(क) सतीशस्य जननी कदा प्रमुदिता अभवत् ?

(ख) आयुर्विद्या यशोबलं कस्य वर्धन्ते ?

(ग) किं श्रुत्वा सतीशः वैद्यम् आनयत् ?

(घ) सतीशः कुत्र अगच्छत् ?

**6. अधोलिखितानि-पदानि वाक्य रचनां कुरुत -**

**पदम्**

यथा- ज्वरेण महेशः ज्वरेण पीडितः

मित्राणि

ताम्

क्रीडाक्षेत्रात्

**7. विचिन्त्य लिखत-**

यदि भवतः सहपाठी रुग्णः स्यात् तदा भवान् किं करिष्यति ? इति लिखत।

**शिक्षण-सङ्केतः- कक्षायां चर्चां कारयतु**

(क) मातुः पितुः श्रेष्ठजनानां च सत्काराय बालकाः किं किं कुर्वन्ति?

(ख) क्रीडनं लाभदायकमस्ति परन्तु गृहे समस्यासु आगतासु प्रथमं किम् आवश्यकम् अस्ति?

**बन्धुबान्धवानां नामानि-**

पितामहः = दादा, पितामही = दादी, पितृव्यः = चाचा,

पितृव्या = चाची भगिनी = बहन, अग्रजः = बड़ा भाई,

अनुजः = छोटा भाई, अग्रजा =बड़ी बहन अनुजा = छोटी बहन,

सहोदरा = सगी बहन, सहोदरः = सगा भाई, जनकः = पिता

जननी = माता, मातुलः = मामा,

भ्रातृजाया = भाभी, भ्रातृजः = भतीजा, भ्रातृजा= भतीजी,

भागिनेयः = भानजा/भगिना ननान्दा = ननद, पितृस्वसा = बुआ,

आवुत्तः = बहनोई, पुत्रः/तनयः = बेटा, मातामहः = नाना।

**न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।**